National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2015; 1(3): 91-95
© 2015 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# श्रीमद्देवीभागवतमाहात्म्यम्

**आचार्यः जि. पद्मनाभम्**

**सारांशः -** अस्मिन् लेखे श्रीमद्देवीभागवतपुराणस्य आध्यात्मिकं तथा व्यावहारिकं महत्त्वं प्रतिपादितम् अस्ति। सूतमहर्षिः शौनकादिमुनीन् कथयति यत् देवीभागवतं सर्वशास्त्रसारभूतम् अस्ति। यथा पापारण्ये कुठारः (परशुः) तथा गाढतमसि अरुणोदयः इव इदं पुराणं वर्तते। वेदव्यासेन अष्टादशपुराणेषु इदं श्रेष्ठतमं मन्यते। लेखे जनमेजयस्य कथा वर्णिता अस्ति, येन पितुः (परीक्षितस्य) मुक्तेः कृते नवाहयज्ञः कृतः। तथैव, सुद्युम्नस्य (इला) स्त्रीत्व-निवारणाय वशिष्ठमहर्षिणा अस्यैव श्रवणं कारितम्। श्रीकृष्णस्य श्यमन्तकमणि-प्राप्तये वसुदेवेन कृतं पारायणम् अपि अस्य अमोघशक्तिं सूचयति । इदं पुराणं धर्म-अर्थ-काम-मोक्षप्रदायकम् अस्ति। अस्य श्रवणेन दरिद्रता, रोगः, बालग्रहबाधा, शत्रुभयं च नश्यति। कलियुगे मानवानां कृते अल्पायुष्काणां च उद्धारार्थं व्यासस्य अयं महान् उपहारः। देवीभागवतश्रवणस्य विशेषविधयः सन्ति । शुचिमासे, विशेषतः शारदीयनवरात्रौ अस्य श्रवणं फलदं भवति। पौराणिकस्य (वक्तुः) योग्यता, श्रोतुः श्रद्धा, उपवासः, ब्रह्मचर्यं, भूशय्या इत्यादयः नियमाः अत्र विस्तरेण उक्ताः। अन्ते कुमारीपूजा, होमः, दानं च कृत्वा पारायणस्य समाप्तिः भवति ।

कूटशब्दाः - भुक्तिमुक्तिप्रदम् (भोगं मोक्षं च यच्छति), नवाहयज्ञः (नवदिनात्मकं पारायणम्), शातकुठारम् (पापारण्यानां नाशकः), देवीसालोक्यम् (देव्याः लोके स्थानम्), चतुर्वर्गफलम् (धर्म-अर्थ-काम-मोक्षाः), सञ्चितपापहारकम् (पूर्वजन्मकृतपापनाशकम्), पौराणिकव्यासः (वक्ता व्यासस्वरूपः), नवाक्षरमन्त्रः (देव्याः जपमन्त्रः), मन्वन्तराधिपतिः (रैवतस्य कथायां प्राप्तं पदम्), मणिद्वीपाधिदेवता (शक्तिस्वरूपा जगदम्बिका) ।

**उपक्रमः**

नैमिशारण्ये समाविष्टाः ऋषयस्सर्वे सविनयं सूतमेवं प्रार्थितवन्तः - हे सूतमहर्षे वर्षशतानि जीवतात् । भवान् व्यासस्य शिष्योऽस्ति, महामतिश्च, अनेकाः पुण्यकथाः अस्मभ्यमतिमनोहरतया श्रावयति । विष्णुकथाः श्राविताः, अवतारगाथाः सुष्ठु वर्णिताः, शिवचरित्राणि त्वम् अश्रावयः, भस्मरुद्राक्षमहिमानञ्च अवर्णयः । भक्तिश्रद्धाभ्यां सम्यगाकर्ण्य वयं भवत्कारणेन ज्ञानानन्द प्राप्तवन्तः । किञ्चेदानीं पावनानां पावनमनायासेन भुक्तिमुक्तिप्रदञ्च महापुराणं श्रोतुमिच्छामः भवन्मुखतः, दयया तादृशं महापुराणमनुगृह्णात्विति ।

तदानीं सुतमहर्षिः - "हे शौनकादिमुनीश्वराः ! भवन्तः प्रष्टव्यमेवापृच्छन् । लोकहिताय पृष्टवन्तः, अतस्सर्वशास्त्रसारभूतं परमपावनञ्च देवीभागवतं श्रावयामि, श्रद्धया शृण्वन्तु । यावत्पर्यन्तं पुराणमिदं न श्रुतं तावत्पर्यन्तमेव इतरपुराणानि, तीर्थानि, व्रतानि च गुरुतराणि भवन्ति। श्रीमद्देवीभागवतपुराणमिदं पापारण्यानां शातकुठारं, गाढकिल्विषतमसानामरुणोदयं श्रावयामि" इति ।

तदानीं शौनकादयः – "हे सूतमहर्षे ! अवश्यं श्रावय, भक्तिश्रद्धालवः भूत्वा श्रुत्वा सार्थकाः भवामः । किं तत्पुराणम् ? के च नियमाः श्रोतुम् ? कति दिनेषु श्रोतव्यम् ? काश्च पूजाः विधेयाः ?

इतः पूर्वं के के श्रुतवन्तः ? कानि कानि फलानि प्राप्तवन्तः ? के के श्रावितवन्तः ?" इति पप्रच्छुः।

तदा सूतः उवाच – "हे मुनीश्वराः । विष्णोरशेन पराशरात्मजत्वेन व्यासस्सम्भूत इति भवन्तः जानन्ति किल । वेदान् चतुर्धा विभज्य शिष्येभ्यः प्रबोधितवान्। वेदाधिकाररहितेभ्यः धर्मज्ञानाय पुराणसंहिताः व्यरचयत्। शिष्यद्वारा प्रचारे आनीतवान्। अष्टादशपुराणानि व्यरचयत्। तानि मह्यम् अश्रावयत्, अपाठ्यच्च। तेषु देवीभागवतम् उत्तमोत्तमं पुराणम् । भुक्तिमुक्तिप्रदश्च पुराणमिदं स्वयं व्यास एव जनमेजयाय अश्रावयत् ।"

जनमेजयस्य पिता परीक्षिन्महाराजः मुनिशापकारणेन तक्षकसर्पदंष्ट्रो भूत्वा दुर्मरणं प्राप्तवान् । तस्य संशुद्धिमभिलक्ष्य जनमेजयः पुराणमिदं श्रद्धया नवदिनानि अशृणोत् । तदनन्तरं देवीयज्ञं कृत्वा सोऽपि सार्थकोऽभवत् । देवीसालोक्यं प्राप्तवान् ।

**देवीभागवतवैशिष्ट्यम्**

धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थप्रदायकमिदं देवीभागवतमहापुराणम्। ये जनाः पुराणमिदं श्रद्धया शृण्वन्ति तेषां सर्वसिद्धयः करतलामलकाः भवन्ति । अतः पुराणमिदं सर्वैरवश्यं श्रोतव्यमस्ति । एकं दिनं वा, तदर्थं वा, मुहूर्तकालो वा उत क्षणमेकं वा भक्त्या पुराणस्यास्य श्रवणं सर्वदुर्गतिनाशकं भवति। सर्वयज्ञ-सर्वतीर्थ-सर्वदानफलानि केवलमस्य श्रवणेनैव सिद्ध्यन्ति । कृतयुगे तु मानवैः आचरितव्याः नियमा अनेकेऽऽसन्। किन्तु कलि-युगे पुराणश्रवणमेक एव धर्मः। कलियुगे मानवाः धर्माचारविहीनाः, अल्पायुष्काश्च भवन्तीति ज्ञात्वा भगवान् व्यासः लोकहिताय पुराणसुधारसममुमद्ऱात्। पुराणरसस्यास्य बिन्दुमात्र-पानेनैव सर्वेऽजरामराः भवन्ति, वंशाश्चाजरामराः भवन्ति।

पुराणमिदं सर्वदा श्रोतुं शक्यते, केऽपि नियमाः न सन्ति। मानवाः भवन्ति चेत्तत् पर्याप्तम्।

**मासानां नियमो नात्र दिनानां नियमोऽपि वा।**
**सदा सेव्यं सदा सेव्यं देवीभागवतं नरैः ।।[1]**

श्रीदेवीनवरात्रिषु नवाहयज्ञश्रवणं विशेषफलदायकं भवति। तथाविधश्रवणेन पूर्वजन्मसु गतजीविते च कृतेभ्यः सर्वेभ्यः पापेभ्यः विमुक्ताः परमपवित्राः भवन्ति। उग्रतपोभिः, तीर्थसेवनैः, विविधदानैः, यज्ञयागादिभिर्वा दुर्लभं पुण्यफलम् अनया नवाहदीक्षया लभ्यते। गङ्गा-गया-काशी-नैमिश-मथुरा-पुष्कर-बदरिकाश्रमेभ्योऽपि अधिकतया इदं नवाहभागवत श्रवणमहायज्ञः फलप्रदो भवति। अत एवायं देवीयज्ञ इत्युच्यते ।

आश्वयुजमासे शुक्लपक्षे कन्याराश्यां सूर्यस्य स्थितौ अष्टम्यां श्रीमन्महादेवीं हेम-सिंहासने समर्च्य योग्याय सब्राह्मणाय देवीभागवतग्रन्थः यदि दीयते तत्पुण्यफलम् एतावदिति वक्तुं न शक्यते। सः दाता साक्षादेवीसालोक्यं प्राप्नोति । देवीभागवते श्लोकमेकं वा तदर्थं वा, पुटमेकं वा, तद्भागं वा प्रतिनित्यं भक्त्या पठ्यते चेदवश्यं भगवत्याः अनुग्रहपात्राः भवन्ति । तर्हि सर्वमपि पुराणं यदि पठ्यते तत्फलं वर्णनातीतमेव। दुःशकुनभयं, दुस्स्वप्नभयं, महामारिभयं, मरणभयं सर्वाण्यपि अपाक्रियन्ते। बालग्रह-भूतप्रेतक्रीडाः सर्वा अपि देवी-भागवतनामकथनेनैव दिग्दिगन्तेषु पालयन्ते। चतुर्विधपुरुषार्थैः विजयपरम्पराभिः गृहस्थाः, तद्वंशाः, वंशस्थाश्च वर्षसहस्राणि विराजन्ते ।

श्यमन्तकमणिमपहृतवानिति अपमानमपाकर्तुं श्रीकृष्णः प्रसेनमन्विषन् अरण्ये गतवान् । बहुदिनानि व्यतीतानि, तथापि न प्रत्यागतवान् गृहम् । तदानीं वसुदेवः देवीभागवतं नवाहदीक्षया श्रुतवान् । तत्सम्पूर्तेः पूर्वमेव श्रीकृष्णः विजयलक्ष्मीसनाथः पुनरागतवान् । तादृशमहिमान्वितमेतत्पुराणश्रवणम् । अपुत्राणां पुत्राः समुद्भवन्ति । निर्धनाः धनिकाः भवन्ति । रोगग्रस्ता अनामया भवन्ति । एतत्तु भागवतामृतम् । वन्ध्याः सन्तानवत्यः भवन्ति । ग्रन्थोऽयं यत्र विद्यते तद् गृहमेवैको तीर्थः । तद्गृहस्थास्सर्वे परमपावनाः, तेषां कष्टं वा, दुःखं वा नैवोपजायते। अपजय एव नायाति । अष्टमी-नवमी-चतुर्दशीतिथिषु पुराणमिदं ये पठन्ति ते देव्याः नितरां प्रीतिपात्राः भवन्ति । ब्राह्मणः वेदविदामग्रगण्यो भवति। क्षत्रियः धरणीपतिर्भवति। वैश्योऽनन्तसम्पद्भिः कुबेरो भवति। शूद्रः सडे उत्तमोत्तमः, परमपूज्यश्च भवति ।

श्रीदेवीभागवतमाहात्म्यसूचकः अन्यः एकः इतिहासः अस्ति, तमपि श्रावयामि, श्रद्धया शृण्वन्त्विति श्रीसूतः पुनरेवं प्रारब्धवान् ।

पूर्वमेकदा अगस्त्यमहर्षिः लोपामुद्रया साकं कैलासं गत्वा स्कन्दात् अनेकाः कथाः गाथाश्च ज्ञातवान् । षण्मुखमुखादनेकतीर्थ-दान-व्रतमाहात्म्यानि शृत्वापि दम्पती असन्तृप्त्या लोकहिताय देवीभागवतं, तन्महिमानञ्च वदत्विति प्रार्थयामासतुः । तदा स्कन्दः उवाच – हे कुम्भसम्भव ! भागवतमाहात्म्यं विस्तृततया वक्तुं कोऽपि न पारयति । भवता पृष्टमिति क्लृप्ततया ब्रवीमि । सच्चिदानन्दरूपिणी भुक्तिमुक्तिप्रदायिनीत्वेन साक्षात्करोति देवीभागवते एव । अतः देवीभागवतं देवीवाङ्मयरूपम् । अस्य श्रवणेन पठनेन च दुर्लभं किमपि सृष्ट्यामस्यां नास्त्येव ।

पूर्वं विवस्वतस्य पुत्रः 'श्राद्धदेव' इति कश्चन राजा आसीत् । तस्य सन्ततिः नासीत् । पुत्रसन्तानार्थं वशिष्ठस्यानुमत्या पुत्रकामेष्टिं कृतवान् । तस्य भार्या श्रद्धादेवी स्त्रीसन्तानमभिलक्ष्य होतारं प्रार्थितवती । सः तथैव होमं कृतवान् । इष्टिः समापिता । तत्फलितेन सा स्त्रीशिशुं प्रसूतवती । तस्याः 'इलावती'ति नामकरणं चकार । श्रद्धादेवः स्त्रीसन्तानप्राप्त्या मनस्तापं प्राप्य वैषम्यस्य कारणं किमिति वशिष्ठमहर्षिं पृष्ट्वा, वशिष्ठस्याज्ञानुसारं महादेवं शिवं प्रार्थितवान् ।

शिवानुग्रहेण, गुर्वनुग्रहेण च इलादेवी पुरुषोऽभवत् । तस्य 'सुद्युम्नः' इति नामकरणं चकार । सः सकलविद्यासमुद्रोऽभवत् । यौवनस्थस्सः मृगयार्थं मेरुपर्वतसमीपे प्रविष्टवान् ।

तस्य वनस्यैकं चरित्रमस्ति । एकदा पार्वतीशिवौ तत्र क्रीडमानौ आस्ताम् । तदानीं शिवदर्शनलालसाः मुनयः तदज्ञात्वा हठात् तत्र प्रविष्टाः । तान् दृष्ट्वा पार्वती लज्जाविष्टाऽभवत् । तद्ज्ञात्वा मुनयः शीघ्रं श्रीहरिं शरणं गतः । किन्तु पार्वत्याः समाश्वासनार्थं शिवः तद्वनं

शशाप । तदारभ्य वने प्रविष्टाः पुरुषाः स्त्रियः भवन्त्विति ।

विषयममुमज्ञात्वा सुद्युम्नः, परिवारजनाश्च तत्र प्रविश्य स्त्रीरूपं प्राप्तवन्तः । पुरुषाश्चाश्च स्त्री-अश्वाः अभवन् । किमपि कर्तुमशक्ताः भूत्वा तत्रैव सञ्चरन्तः बुधस्याश्रमं प्राप्तवन्तः । इमां सुन्दरनारीं दृष्ट्वा बुधः, तं दृष्ट्वा सा च परस्परं प्रेमानुभूतिं प्राप्य, तत्फलितत्वेन पुरूरवजन्मकारकौ अभवताम् । कालक्रमेण तस्याः पूर्ववृत्तान्तः स्मृतावागत्य दुःखेन ततः गुरोः वशिष्ठाश्रमं गत्वा, पुरुषत्वाय प्रार्थितवती ।

वशिष्ठः मन्त्रशक्त्या सर्वमपि वृत्तान्तं ज्ञात्वा, कैलासं गत्वा शिवं सम्प्रार्थ्य, अभ्यर्च्य बहुधा संस्तुतवान् -

**नमो नमः शिवायास्तु शङ्कराय कपर्दिने ।**
**गिरिजार्थाङ्गदेहाय नमस्ते चन्द्रमौलये ।।**[2]

मृड । कैलासवासिन् । नीलकण्ठ । भुक्तिमुक्तिप्रदायक ! शिवरूप । शिव। प्रपन्नभय-हारिन् । वृषभवाहन । शरण्य। परमात्मन्! त्रिमूर्तिस्वरूप ! नमो नम इति ।

शिवः पार्वत्यासाकं साक्षात्कारं दत्वा वरं दत्तवान्। वशिष्ठः सुद्युम्नस्य पुरुषत्वं प्रसादयत्विति प्रार्थितवान् । शिवः तथैवेत्युक्त्वा एकस्मिन् मासे पुरुषत्वेन, एकस्मिन् मासे स्त्रीत्वेन च भवतीति अभ्यनुज्ञां प्रदाय अन्तर्हितोऽभवत्। वशिष्ठः सन्तृप्तिमप्राप्य जगदीश्वरी
स्तुतवान् -

**जय देवि ! महादेवि! भक्तानुग्रहकारिणि ! ।**
**जय सर्व सुराराध्ये! जयानन्तगुणालये !।।**[3]

शरणागतवत्सले ! दुर्गे ! देवेशि। दुःखहन्त्री! दुष्टदैत्यनिषूदिनि! भक्तिगम्य। महामाये। जगदम्बिके। संसारसागरोत्तारपोती-भूतपदम्बुजे! त्रिमूर्तिसंसेविते। चतुर्वर्गप्रदायिनि। कः त्वां स्तोतुं समर्थः ? केवलं भक्त्या नमस्कार एव कर्तव्योऽस्ति इति ।

वशिष्ठस्य स्तोत्रमाकर्ण्य जगदीश्वरी प्रसन्नाऽभवत्। सुद्युम्नस्य मन्दिरं गत्वा भक्त्या मां समर्थ्य, ममात्यन्तप्रीतिपात्रं देवी भागवतं नवाहनियमेन तस्मै श्रावयतु। तत्परिसमाप्तेः पूर्वमेव पुनस्तस्य पुंस्त्वं सिद्ध्यति इति आज्ञां प्रदत्तवती।

वशिष्ठः देव्याज्ञानुसारम् आश्वयुजशुक्लपक्षे सुद्युम्नेन भागवतश्रवणमकारयत् । सुद्युम्नः भक्त्या श्रुत्वा, देवीं वशिष्ठय समाराध्य पुरुषत्वमलभत। कालान्तरे तपोनिष्ठया देवीसालोक्य-मगच्छत् ।

अगस्त्य । तादृशं वर्णनातीतं देवीभागवतमाहात्म्यम्। पठितृणां, श्रोतृणाञ्च सकल-वाञ्छाप्रदम्, इहपरसाधकम् इति स्कन्दः इतिहासं समापितवान् ।

अगस्त्यः सन्तृप्तो नाभवत् । इतोऽपि एतादृशाः विचित्रकथाः देवीभागवतमहिमापराः इतिहासाः केऽपि सन्ति चेत् कृपया श्रावयत्विति अगस्त्येन प्रार्थितः स्कन्दः पुनः प्रारब्धवान्-

अगस्त्य ! भगवत्याः इदं भागवतम् इति अस्य व्युत्पत्तिः। गायत्रीमहिमा विस्तृततया वर्णिता इत्यतोऽपि अस्य भागवतमिति नाम प्रसिद्धम्। सा भगवती ब्रह्मविष्णुशिवाराध्या। एतन्मातृम-हिमापरा अन्यगाथैका विद्यते, ब्रवीमि, श्रृणुताम् -

ऋतवाक् इति कश्चन महर्षिरासीत्। तस्य धर्मपत्न्यां रेवतीनक्षत्रयुक्त-गण्डान्तकाले एकः पुत्रः सञ्जातः। तस्मादारभ्य ऋषिदम्पती आधिव्याधिपीडितौ अभवताम्। तत्र कारणं तुन ज्ञातम् । प्रायः पुत्रोऽयं गतजन्मसु महापापानि कृतवान् स्यात्, ऋषिपत्नीनां शीलमपहृतवान् स्यात्, अत एव तत्पापफलम् आवाम् पीडयतीति तौ दुःखमनुभूतवन्तौ ।

**कुपुत्रेणान्वयो नष्टो जन्म नष्टं कुभार्यया।**
**कुभोजनेन दिवसः कुमित्रेण सुखं कुतः ।।**[4]

इत्येवं दुःखमनुभवतयोः तयोः सकाशम् एकदा गर्गमहर्षिरागत्य एवमुक्तवान् - हे ऋतवाङ्मुने ! अन्न भवतोः दोषः कोऽपि न विद्यते। भवत्पुत्रः दुर्मुहूर्ते सञ्जातः। रेवतीगण्डान्तकाले सम्भूतत्त्वात् दुःशीलो जातः। तदेव भवदाधिव्याधीनां कारणम्। एतद्दुःखापनोदनार्थं दुर्गतिनाशिनीं दुर्गादेवीम् उपास्यताम्, सर्वदोषशान्तिर्भवतीति प्रगद्य गतवान्। रेवतीनक्षत्रे ऋतवाङ्महर्षेः महत्कोपो जातः, भुवि पतत्विति शशाप। समनन्तरमेव तन्नक्षत्रं भुवि कुमुदाद्रेः उपरि पतितम् । तदारभ्य सः पर्वतः रैवतिकाद्रिरभवत् । तदनन्तरम् ऋतवाङ्गनिः तस्य भार्या च जगदम्बिकां सम्पूज्य सुखं शान्तिञ्चालभताम्। कुपुत्रः सुपुत्रो भूत्वा सर्वैः प्रशंसितः ।

तद्रेवतीनक्षत्रतेजसः मणिसदृशा कन्यकैका समुद्धृता। सा लक्ष्मीदेवीवत् भासमाना आसीत्। तां। तां दृष्ट्वा आश्चर्यचकितो प्रमुचमहर्षिः ताम् आश्रमं नीत्वा, रेवतीति नामकरणं कृत्वा, सुपुत्रिकामिव पोषितवान्। सा क्रमेण यौवनवती सञ्जाता। तस्यै अनुरूपवराय प्रमुचः बहुधा अन्विष्टवान्, किन्तु न लब्धवान्। अतः अग्निदेवं स्तुतवान्। अग्निना रेवत्यै दुर्दमः अनुरूपवर इति ज्ञात्वा सन्तुष्टो जातः ।

दैववशात् दुर्दमः महर्षेराश्रमं प्रत्यागतवान्। रेवतीं। रेवतीं परिग्रहीतुं प्रमुचेन प्रार्थितः दुर्दमो अङ्गीकृतवान् । रेवती विषयमिमं ज्ञात्वा रेवतीनक्षत्रे एव विवाहो कार्य इति प्रमुचं प्रार्थितवती ।

ऋतवाङ्गनिशापकारणात् तन्नक्षत्रमिदानीमाकाशे एव नास्ति, कथं तस्मिन् नक्षत्रे विवाहं कर्तुं शक्यते इत्युक्तवान् प्रमुचः । किन्तु रेवत्याः दीक्षां दृष्ट्वा स्वतपोशक्त्या नक्षत्रवीथ्याम् अन्य-द्रेवतीनक्षत्रं सृष्टवान्। तस्मिन्नेव मुहूर्ते रेवतीदुर्दमयोः विवाहः सञ्जातः। प्रमुचः सन्तुष्टो भूत्वा दुर्दमं वरं वृणीष्वेत्युक्तवान् ।

दुर्दमः – प्रमुचमहर्षे ! अहं स्वायम्भुवमनुवंशे सञ्जातः। अतः मन्वन्तराधिपतिं पुत्रम् अनुगृह्णात्विति प्रार्थितवान्। तर्हि दुर्दम! महादेवीम् उपास्यताम्, कार्यसिद्धिर्भवत । 

देवीभागवतमिति महापुराणमस्ति, तत्पञ्चमं पुराणम्। तत्पुराणं पञ्चवारं शृणोतु, भवत्पुत्रः पडममन्वन्तराधिपतिः भविष्यति इति

प्रमुचः आशीर्वादं दत्तवान्।

एकदा लोमशमहर्षिः दुर्दमस्य राजधानीं प्रत्यागतवान्। दुर्दमः यथोचितातिथिसत्कारं कृत्वा महर्षे। । देवीभागवतं श्रोतुमिच्छामि, कृपया श्रावयत्विति सम्प्रार्थितवान्। लोमशः आनन्देन महाराज। जगदम्बिकायां भवतः भक्तिरुद्भूता, महदानन्दकरोऽयं विषयः। देव्याः भकानामवश्यं कार्यसिद्धिर्भवति, देवीभागवतमवश्यं श्रावयामीत्युक्त्वा, एकस्मिन् शुभे मुहूर्ते प्रारभ्य पञ्चभिः आवृत्तिभिः पुराणं श्रावितवान् । रेवतीसहितः दुर्दमः भक्तिश्रद्धाभ्यां श्रुतवान् । परिसमाप्तिदिने वेदपण्डितेभ्यः, तेषां धर्मपत्नीभ्यः सुवर्णाम्बरादिवस्तूनि प्राददात् । नवाक्षर-मन्त्रैः होमात्, कुमारीपूजाः कृत्वा महासन्तर्पणमकरोत् ।

रेवती गर्भं धृतवती । शुभे मुहूर्ते लोककल्याणकारकं पुत्रं प्रसूतवती। दुर्दमेन जातकर्मादिक्रिया-स्सर्वाः उत्सवरूपेण कृताः। भूरिदक्षिणैः विप्राः सन्तुष्टा अभवन् । रैवतः दिन-दिनप्रवृद्धमानोऽभवत्। उपनयनं प्राप्य, गुरुकुले सर्वशास्त्राणि, वेदान् समग्रतया अधीतवान्। धनुर्विद्यापारङ्गतोऽभवत्। धर्मशास्त्रस्य वक्ता कर्ता चाभवत्। ब्रह्मदेवः रैवतस्य योग्यतां संवीक्ष्य तं मन्वन्तराधिपतिमकरोत् ।

कुम्भसम्भव ! अगस्त्य! एतावन्महिमान्वितं श्रीमद्देवीभागवतश्रवणम्। क्लुप्ततया प्रोक्तवानहम्। परिपूर्णतया वक्तुं कोऽपि न प्रभवति इति स्कन्दः समापितवान्। लोपामुद्रागस्त्यौ तदा तावता सन्तुष्टी भूत्वा आश्रममगच्छताम्। अतः शौनकादिमहामुनीश्वराः। पुराणस्यास्य श्रवणफलमनन्तमित्युक्तवान् सूतमहर्षिः ।

हे सूतमहर्षेः देवीभागवतमाहात्म्यमद्भुततया विवृणुतवान्, महदानन्दमजनयत्। पुराण-स्यास्य श्रवणाय के के नियमाः पालितव्याः ? कदा प्रारभ्येत? कुत्र प्रारभ्येत? कथं श्रोतव्यम् सन्देहानिमान् अपाकृत्य तदनन्तरं पुराणं श्रावयत्विति अभ्यर्थितवन्तः शौनकादयः। तदा सूतमहर्षिः - महर्षयः। एतत्पुराणश्रवणस्य केचन नियमाः साधारणाः वर्तन्ते। तन्नियमपालनेन श्रवणफलं समग्रतया लभ्यते, सकलवाञ्छापरिपूर्तिर्भवति। प्रथमतया दैवज्ञैः शुभमुहूर्तः निर्णेतव्यः। शुचिमासे आरभ्य (ज्येष्ठः अथवा आषाढः) षण्मासाः शुभावहाः। हस्त-अश्विनि-मूल-पुष्यमी नक्षत्राणि उचितानि। तत्तदुचिततिथिवारेषु आरभ्येत। धर्मप्राप्ति-लक्ष्मीप्राप्ति-सुखप्राप्ति-पीडानिवारणं-राजभयनिवारणं-ज्ञानप्राप्तिः एवं तत्तद्वाञ्छानुसारं मुहूर्तः निर्णतव्यः। देवीप्रीतये तु देवीनवरात्रचतुष्टयमुत्तमम्। इतरेष्वपि मासेषु च कर्तुं शक्यते, निष्कामत्वात् ।

विवाहस्येवास्य नवाहदेवीभागवतश्रवणयज्ञस्यालोभेन वस्त्वादिकं समीकृत्य, देवी-भक्तपराणां साहाय्यं स्वीकृत्य परितः स्थितेभ्यः ग्रामेभ्यः वार्ता प्रेषणीया। शैव-वैष्णवादि मतानुयायिभिस्सर्वैः, चतुर्वर्णजनैः, स्त्रीपुरुषाभेदेन श्रोतुं शक्यते। सर्वेभ्यः वासः कल्पनीयः । सुविशालावरणे वेदिकां निर्माय सम्यगलङ्कृत्य पौराणिकाय प्राग्दिशि अथवा उत्तर-दिशि वा आसनं परिकल्प्य, श्रोतॄणामपि यथोचितं यथासौकर्यमासनानि, स्त्रीपुरुषाणां पृथक् पृथक् कल्पनीयानि ।

पौराणिकः देव्याराधनतत्परः, विविधपुराणशास्त्रज्ञः, सुगात्रः, दयालुः, निस्पृहः, दक्षः, धीरः, निग्रहवाञ्च भवेत्। श्रोतारोऽपि देवता भक्ताः, कथारसपरायणाः, आलोलुपादि-

गुणान्विताः भवेयुः। प्रधानतया शिवकेशवभेदभावरहिताः भवेयुः। पौराणिकस्य सन्निधी सन्देहनिवृत्तिकरणार्थं पण्डितो नियुज्येत।

प्रारम्भमुहूर्तस्य पूर्वदिने एव वक्तृभिः श्रोतृभिश्च क्षुरकर्म प्राप्तव्यम्। सबैः पुराणश्रवणदीक्षा स्वीकर्तव्या । प्रातरेव काले काल्य-स्नान-सन्ध्यादिकार्याणि समाप्य श्रोतुमुप-विशेयुः । कथाश्रवणयोग्यत्व-सिद्ध्यै यथाशक्ति गोदानं करणीयम्।

निर्विघ्नपरिसमाप्तिकाङ्गया प्रथमतया गणपतिं पूजयेत् । कलशं संस्थाप्य समर्च्य बटुक-क्षेत्रपाल-योगिनी-मातृका-तुलसी-ग्रह-हरि-हरादीनां यथाविधि पूजनं विशेषफलदायक भवति। नवाक्षरमन्त्रेण जगदम्बिकामर्चयेत् । श्रीमद्देवीभागवतग्रन्थं सकलोपचारैः पूजयेत्, ग्रन्थोऽयम् आदिपराशक्तेः वाङ्गयरूपः, शोभनाक्षरविराजित इत्यतः।

विघ्नोपशान्तये पञ्चभिः ब्राह्मणैः प्रतिनित्यं नवदिनेषु नवाक्षरमन्त्रजपः करणीयः, सप्तशतीपारायणमपि क्रियेत। पुराण-श्रवणात् प्राक् अनन्तरञ्च प्रतिदिनं प्रदक्षिणनमस्कारान् कृत्वा जगदम्बिकां स्तोत्रेण पूजयेत् ।

**कात्यायनि महामाये भवानि भुवनेश्वरि ।**

**संसारसागरे मग्नं मामुद्धर कृपामये ।।**

**ब्रह्मविष्णुशिवाराध्ये प्रसादं जगदम्बिके।**

**मनोऽभिलषितं देवि वरं देहि नमोऽस्तु ते ।।**[5]

पौराणिकं व्यासबुद्ध्या सम्मानयेत् । पुष्पमालिकालङ्कारवस्त्रादीनि समर्पयेत् ।

**सर्वशास्त्रेतिहासज्ञ व्यासरूप नमोऽस्तु ते।**

**कथाचन्द्रोदयेनांतस्तमस्तोभं निराकुरु ।।**[6]

एवं प्रतिनित्यं सम्प्रार्थ्य श्रद्धया पुराणश्रवणं कुर्यात्। एतन्नवदिनेषु एकवारभोजनमुत्तमम् । हविष्यान्नमुत्तमोत्तमम्।

**मलमूत्रजयायैषां लघुभोजनमिष्यते ।**

**हविष्यान्नं वरं भोज्यं सकृदेव वरार्थिना ।।**

**अथवा स्यात्फलाहारी पयोभुग्वा घृताशनः ।**

**यथास्नानकथाविघ्नस्तथा कार्यं विचक्षणैः ॥**[7]

नवदिनेषु ब्रह्मचर्यं पालयन्, भूशय्यां स्वीकृत्य, पत्रेषु भुञ्जन्, सत्यवान्नियमेन, इन्द्रियनिग्रहेण च कथाश्रवणं कुर्यात्।

कुमारी-सुवासिनी-ब्राह्मण-ब्रह्मचारीपूजाः, सन्तर्पणानि च प्रतिनित्यं करणीयानि। नित्यं वक्तुः, देवीभागवतग्रन्थस्य च पूजा विधेया। वक्त्रा दीयमानः प्रसादः भक्त्या स्वीकर्तव्यः । सर्वदोषनिवारकत्वेन विष्णुसहस्रनामस्तोत्रं पठ्येत। विष्णुस्मरणेन तपोयज्ञादिषु ज्ञात्वा

अज्ञात्वा वा कृताः लोपाः, दोषाः अपाकृत्य समस्तं सम्पूर्ण भवति।

**यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।**
**नूनं सम्पूर्णतां याति तस्माद्विष्णुश्च कीर्तयेत् ।।**[8]

समाप्तिदिने देवीसप्तशतीमन्त्रैः नवाक्षरमन्त्रैश्च होमः कर्तव्यः। पायसेन घृतेन वा गायत्रीहोमः तज्ज्ञानां विप्रानां सूचनानुसारं करणीयः। यथाशक्ति भू-सुवर्ण-वस्त्र-भूषणादि दानैः पौराणिकं सन्तुष्टं कुर्यात्। देवीनवरात्रिषु अष्टम्यां वा नवम्यां वा देवीभागवतग्रन्थं समर्थ्य, पौराणिकेभ्यः विप्रेभ्यश्च दद्यात्। दानमिदं सकलान्यपि पापानि हरति, इहलोके भोगान्, परलोके मुक्तिंश्च प्रसादयति। पौराणिकः व्याससमानः, वन्द्यश्च ।

**सन्ति लोकस्य बहवः गुरवो गुणजन्मतः ।**
**सर्वेषामपि तेषाञ्च पुराणज्ञः परो गुरुः ।।**
**पौराणिको ब्राह्मणस्तु व्यासासनसमाश्रितः ।**
**असमाप्ते प्रसङ्गे तु नमस्कुर्यान्न कस्यचित् ।।**[9]

कथञ्चिदपि एवं नियमावलि पालयन् नवदिनेषु नवपर्यायाणि श्रीमद्देवीभागवतमिदं शृणोति चेत् तत्फलितं वर्णनातीतमेव। सः जीवन्मुक्तो भवति। राजभयं, शत्रुभयं, महामारी-भयं, दुर्भिक्षभयं, राष्ट्रभन्नभयमेतादृशानि सर्वाण्यपि अपाक्रियन्ते। तस्मात् श्रीदेवीभागवता-राधनेन सर्वदोषनिवृत्तिः, सर्वफलावाप्तिश्च भवतीति ज्ञायते।

**श्रीमद्भागवतं यस्तु पठेद्वा शृणुयादपि।**
**श्लोकार्थं श्लोकपादं वा स याति परमां गतिम् ।।**
**ब्रह्मेशाच्युतशक्राद्यैः महर्षिभिरुपासिता ।**
**जगतां श्रेयसे सास्तु मणिद्वीपाधिदेवता ।।**[10]

**उपसंहारः -** निष्कर्षतः, **श्रीमद्देवीभागवतपुराणम्** केवलं प्राचीनग्रन्थो नास्ति, अपितु कलियुगस्य दुःखाग्निना दग्धानां मानवानां कृते शीतलम् अमृतम् अस्ति। अस्मिन् लेखे वर्णिताः जनमेजय-सुद्युम्न-रैवत-श्रीकृष्णानां कथाः अस्य पुराणस्य अमोघशक्तिं प्रमाणीकुर्वन्ति। नवाहयज्ञस्य नियमाः भक्तस्य अन्तःकरणं शुद्धं कृत्वा तं देव्याः सामीप्यं नयन्ति। इदं पुराणं **'भुक्तिमुक्तिप्रदं'** वर्तते, यत्र इहलोके सुखानि परलोके च मोक्षः सुलभाः सन्ति। समाजस्य सर्वे वर्गाः अस्य श्रवणेन लाभान्विताः भवितुं शक्नुवन्ति। अतः अशान्तिमये जीवने शान्तिं प्राप्तुं तथा च आध्यात्मिक-अभ्युदयाय जगदम्बिकायाः वाङ्मयरूपस्य अस्य महापुराणस्य आश्रयः सर्वेषां कृते अनिवार्यः कल्याणकारी च वर्तते।

**।। सहायकग्रन्थसूची ।।**


१) श्रीमद्देवीभागवतपुराणम्,महर्षि-वेदव्यासः, गीताप्रेस, गोरखपुर, २०१८ (पुनर्मुद्रणम्) ।

२) श्रीमद्देवीभागवतमाहात्म्यम् (पद्मपुराणान्तर्गतम्), सम्पा. डा. मदनमोहनपाठकः,चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२।

३) आन्ध्र महाभागवतमु (तेलुगु रूपान्तरम्), बम्मेरा पोतना, टी.टी.डी. (T.T.D.), तिरुपति, २०१५ ।

४) पुराणविमर्शः, आचार्य बलदेव उपाध्यायः, चौखम्बा विद्याभवन, वाराणसी, २००५ ।

५) देवीभागवतम् (हिन्दी व्याख्या सहितम्), श्री रामनारायण दत्त शास्त्री, गीताप्रेस, गोरखपुर, २०१० ।

६) The Srimad Devi Bhagawatam (English Trans.), Swami Vijnanananda Munshiram Manoharlal, New Delhi, १९९८।

७) श्रीमद्देवीभागवतमहापुराणम्, नाग् पब्लिसर्स, दिल्ली, 1986 ।

८) श्रीमद्देवीभागवतमु(Telugu),बेतवोलु रामब्राह्मम्, वि.जि.एस्. पब्लिकेशन्स, विजयवाडा, 2010।

९) भागवतोपाख्यानानि(तेलुगु), साम्राज्यलक्ष्मीराव, श्रीनाथपारम्स PVT, हैदराबाद, १९७८ ।


**संदर्भः ग्रन्थः -**


1.दे.भा. (तेलुगु) माहात्म्यकथने

2.दे. भा. (तेलुगु) माहात्म्यकथने

3.दे.भा. (तेलुगु) माहात्म्यकथने

4.दे. भा. (तेलुगु) माहात्म्यकथने

5.दे.भा. (तेलुगु) माहात्म्यकथने

6.दे.भा. (तेलुगु) माहात्म्यकथने – 1-8

7.दे.भा. (तेलुगु) माहात्म्यकथने -1-10

8.दे.भा. (तेलुगु) माहात्म्यकथने

9.दे.भा. (तेलुगु) माहात्म्यकथने-1-11,12

10. दे.भा. (तेलुगु) माहात्म्यकथने-1-12